| उपोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| | कर्त्तृकयदयन्नववधे यदयत्प्रायश्चित्तमुक्तं अप्रवृत्तप्रवर्त्तकरूपप्रयोजकस्य तत्तत्प्रायश्चित्तस्य पादत्रयम्। प्रवृत्तप्रवर्त्तकरूपप्रयोजकस्य पादद्वयम्। स्वल्पप्रवृत्तृरूपानुग्राहकस्य पादत्रयम्। वध्यप्रतिरोधकरूपानुग्राहकस्य पादद्वयम्। | | | |
| ब्राह्मणक्षत्रियवैश्यकर्त्तृकशूद्रेतरस्वामिकगवापालननिमित्तवधः। | सेतिकर्त्तव्यताकप्राजापत्यम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। इति कर्त्तव्यता यथा। सशिखं वपनं कार्य्यं त्रिसन्ध्यमवगाहनम्। शृङ्गैर्वापि खुरैर्युक्तं लाङ्गूलश्रवणादिभिः॥ आर्द्रमेव हि तच्चर्म्म परिधाय स गां व्रजेत्। तासां मध्ये वसेद्रात्रौ दिवा ताभिः समं व्रजेत्॥ ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः। प्रायश्चित्ते ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम्। अनडुत्सहितां गाश्च दद्याद्विप्राय दक्षिणाम्॥ इति पराशरोक्ता। | २ धेनू। | ६ कार्षापणाः। | १ वृषः १ गौः। अशक्तौ ६ कार्षापणाः। |
| ब्राह्मणक्षत्रियवैश्यकर्त्तृकशूद्रस्वामिकगवापालननिमित्तवध। | प्राजापत्यद्वयम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। | २ धेनू। | ६ कार्षापणाः। | यथाशक्ति। |
| ब्राह्मणक्षत्रियवैश्यशूद्रकर्त्तृकशूद्रेतरस्वामिकाप्राप्तदम्यावस्थगोवत्सापालननिमित्तवधः। अप्राप्तदम्यावस्था तु विहायणपर्य्यन्तम्। | सेतिकर्त्तव्यताकप्राजापत्यपादः। | धेनोरर्द्धस्यासम्भवात् १ एका धेनुः। | १॥० कार्षापणाः। | १॥० कार्षापणाः। |
| ब्राह्मणक्षत्रियवैश्यशूद्रकर्त्तृकशूद्रस्वामिकाप्राप्तदम्यावस्थगोवत्सापालननिमित्तवधः। | प्राजापत्यव्रतद्वयपादः। | धेनोरर्द्धस्यासम्भवात् १ एका धेनुः। | १॥० कार्षापणाः | यथाशक्ति। |
| उत्सृष्टवृषवत्सतर्य्योर्वधः। | भूतपूर्व्वस्वामिकगववधप्रायश्चित्तद्विगुणम्। पूर्व्वस्वाम्यज्ञाने ब्राह्मणस्वामिकगववधद्विगुणप्रायश्चित्तम्। | | | |
| गवां शृङ्गभङ्गास्थिभङ्गचर्म्मनिर्म्मोचनलाङ्गूलच्छेदनम्। | दशरात्रं वत्सव्रतम्। मासार्द्धं यवपानम्। प्राजापत्यं वा। वत्सव्रतं यथा। गोमूत्रेण समायुक्तं यावकञ्चोपयोजयेत्। एकाहेनैव कृच्छ्रोऽयमुक्तश्चाग्निरसा स्वयम्। सर्व्वपापहरो दिव्यो नाम्ना वत्स इति स्थितः॥*॥ शृङ्गभङ्गादिना षण्मासाभ्यन्तरे गोर्मरणे अन्यूनं वधप्रायश्चित्तं करणीयम्। गुरुणा समेन वा तेन प्रायश्चित्तेन शृङ्गभङ्गादिप्रायश्चित्तसिद्धिः। षण्मासोत्तरमरणे शृङ्गभङ्गादिप्रायश्चित्तमात्रं कर्त्तव्यम्॥ | १ धेनुः। | २ कार्षापणाः। | यथाशक्ति। |
| गवां मुष्कमोषः। | यत्कर्त्तृकयत्स्वामिकगववधे यत्प्रायश्चित्तमुक्तं तत्कर्त्तृकतत्स्वामिकगवमुष्कमोषे तत्प्रायश्चित्तम्। मृत्युलिङ्गच्छेदयोस्तुल्यत्वाभिमानात्। अत्र प्रयोजकभेदस्यार्द्धं पादोनञ्च। | | | |